बौधायनशुल्बसूत्रम्

अथेमेऽग्निचयाः १ तेषां भूमेः परिमाणविहारान्व्याख्यास्यामः २ अथाङ्गु लप्रमाणं चतु र्दशाणवः चतु स्त्रिं शत्तिलाः पृथु सं श्लिष्टा इत्यपरम् । दशाङ्गुलं क्षुद्रपदम् । द्वादश प्रादेशः । पृथोत्तरयु गेत्रयोदशिके। पदं पञ्चदश । अष्टाशीतिशतमीषा । चतुःशतमक्षः । षड-शीतिर्यु गम् । द्वात्रिं शज्जानुः । षट्त्रिं शच्छम्याबाहू । द्विपदः प्र-क्रमः । द्वौ प्रादेशावरत्निः । अथाप्यु दाहरन्ति पदेयु गेप्रक्रमेऽर-त्नावियति शम्यायां च मानार्थेषु याथाकामीति । पञ्चारत्निः पुरुषो व्यामश्च । चतु ररत्निर्व्या यामः ३ चतु रश्रं चिकीर्षन्यावच्चिकीर्षेत्ताव-तीं रज्जु मु भयतः पाशां कृत्वा मध्येलक्षणं करोति । लेखामालिख्य तस्या मध्येशङ्कुं निहन्यात् । तस्मिन्पाशौ प्रतिमु च्य लक्षणेन म-ण्डलं परिलिखेत् । विष्कम्भान्तयोः शङ्कूत्न निहन्यात् । पूर्वस्मि-न्पाशं प्रतिमु च्य पाशेन मण्डलं परिलिखेत् । एवमपरस्मिं स्तेयत्र समेयातां तेन द्वितीयं विष्कम्भमायच्छे त् । विष्कम्भान्तयोः शङ्कूत्न निहन्यात् । पूर्वस्मिन्पाशौ प्रतिमु च्य लक्षणेन मण्डलं परिलिखेत् । एवं दक्षिणत एवं पश्चादेवमु त्तरतस्तेषां येऽन्त्याः सं सर्गा स्तच्चतु रश्रं सं पद्यते४ अथापरम् । प्रमाणाद्द्विगुणां रज्जु मु भयतः पाशां कृत्वा मध्येलक्षणं करोति । स प्राच्यर्थः । अपरस्मिन्नर्धेचतु र्भा गोनेलक्षणं करोति । तन्न्यञ्चनम् । अर्धेऽसार्थं । पृष्ठ्यान्तयोः पाशौ प्रतिमु च्य न्यञ्चनेन दक्षिणापायम्यार्धेन श्रोण्यं सान्निर्हरेत् ५ दीर्घचतु रश्रं चिकी-र्षन्याव-च्चिकीर्षेत्तावत्यां भूम्यां द्वौ शङ्कूत्न निहन्यात् । द्वौ द्वावेक - कमभितः समौ । यावती तिर्यङ्मानी तावतीं रज्जु मु भयतः पाशां कृत्वा मध्येलक्षणं करोति । पूर्वेषामन्त्ययोः पाशौ प्रतिमु च्य लक्षणेन दक्षिणापायम्य लक्षणेलक्षणं करोति । मध्यमेपाशौ प्रतिमु च्य लक्ष-णस्योपरिष्टाद्दक्षिणापायम्य लक्षणेशङ्कुं निहन्यात् । सोंऽस एतेनोत्त-रोंऽसो व्याख्यातस्तथा श्रोणी ६ यत्र पु रस्तादं हीयसीं मिनु यात्तत्र तदर्धे लक्षणं करोति ७ अथापरम् । प्रमाणादध्यर्धां रज्जु मु भयतः पाशां कृत्वापरस्मिं स्तृतीयेषड् भागोनेलक्षणं करोति । तन्न्यञ्छनम् । इष्टेंऽसार्थम् । पृष्ठ्यान्तयोः पाशौ प्रतिमु च्य न्यञ्छनेन दक्षिणापाय-म्येष्टेन श्रोण्यं सान्निर्हरेत् ८ समचतु रश्रस्याक्ष्णयारज्जु द्वि स्तावतीं भूमिं करोति ९ प्रमाणं तिर्यग्द्विकरण्यायामस्तस्याक्ष्णयारज्जु स्त्रिकरणी १० तृतीयकरण्येतेन व्याख्याता नवमस्तु भूमेर्भागो भवतीति ११

दीर्घचतुरश्रस्याक्ष्णयारज्जुः पाश्र्वमानी तिर्यङ्मानी च यत्पृथग्भूते कुरुतस्तदुभयं करोति १२

तासां त्रिकचतुस्कयोद्द्वादशिकपञ्चिकयोः पञ्चदशिकाष्टिकयोः सप्तिकचतु र्विं शिकयोद्द्वा दशिकपञ्चत्रिं शिकयोः पञ्चदशिकषट्त्रिंशिकयोरित्येतासूपलब्धिः १३

१

नानाचतु रश्रेसमस्यन्कनीयसः करण्या वर्षी यसो वृध्रमु ल्लिखेत् । वृध्रस्याक्ष्णयारज्जुः समस्तयोः पाश्श्वमानी भवति १ चतु रश्राच्चतु रश्रं निर्जिहीर्षन्यावन्निर्जिहीर्षेत्तस्य करण्या वर्षी यसो वृध्रमु ल्लिखेत् । वृध्रस्य पाश्श्वमानीमक्ष्णयेतरत्पाश्श्वमु पसं हरेत् । सा यत्र निपतेत्तदप-च्छिन्द्यात् । छिन्नया निरस्तम् २ समचतु रश्रं दीर्घचतु रश्रं चिकीर्षं -स्तदक्ष्णयापच्छिद्य भागं द्वे धा विभज्य पाश्श्वयोरुपदध्याद्यथायोगम् ३ अपि वै तस्मिं श्चतु रश्रं समस्य तस्य करण्यापच्छिद्य यदतिशिष्यतेत-दितरत्रोपदध्यात् ४ दीर्घचतु रश्रं समचतु रश्रं चिकीर्षं स्तिर्यङ्मानीं करणीं कृत्वा शेषं द्वे धा विभज्य पाश्श्वयोरुपदध्यात् । खण्डमावापेन तत्सं -पूरयेत् । तस्य निर्हा र उक्तः ५ चतु रश्रमेकतोऽणिमच्चिकीर्षन्नणिम-तः करणीं तिर्यङ्मानीं कृत्वा शेषमक्ष्णया विभज्य विपर्यस्येतरत्रोपद-ध्यात् ६ चतु रश्रं प्रौगं चिकीर्षन्यावच्चिकीर्षेद्द्विस्तावतीं भूमिं समच-तु रश्रां कृत्वा पूर्वस्याः करण्याः मध्येशङ्कुं निहन्यात् । तस्मिन्पाशौ प्रतिमु च्य दक्षिणोत्तरयोः श्रोण्योर्निपातयेत् । बहिस्पन्द्यमपच्छिन्द्यात् ७ चतु रश्रमु भयतः प्रौगं चिकीर्षन्यावच्चिकीर्षेद्द्विस्तावतीं भूमिं दीर्घ-चतु रश्रां कृत्वा पूर्वस्याः करण्याः मध्येशङ्कुं निहन्यात् । तस्मिन्पा-शौ प्रतिमु च्य दक्षिणोत्तरयोर्मध्यदेशयोर्निपातयेत् । बहिःस्पन्द्यमप-च्छिन्द्यात् । एतेनापरं प्रउगं व्याख्यातम् ८ चतु रश्रं मण्डलं चि-कीर्षन्नक्ष्णयार्धं मध्यात्प्राचीमभ्यापातयेत् । यदतिशिष्यतेतस्य सह तृतीयेन मण्डलं परिलिखेत् ९ मण्डलं चतु रश्रं चिकीर्षन्विष्कम्भम-ष्टौ भागान्कृत्वा भागमेकोनत्रिं शधा विभज्याष्टाविं शतिभागानु द्धरेत् । भागस्य च षष्ठमष्टमभागोनम् १० अपि वा पञ्चदशभागान्कृत्वा द्वा-वु द्धरेत् । सै षानित्या चतु रश्रकरणी ११ प्रमाणं तृतीयेन वर्धयेत्तच्च चतु र्थेनात्मचतु स्त्रिं शोनेन । सविशेषः १२

२

अथाग्न्याधेयिके विहारेगार्हपत्यादाहवनीयस्यायतनम् । विज्ञाय-तेऽष्टषु प्रक्रमेषु ब्राह्मणोऽग्निमादधीतै कादशसु राजन्यो द्वादशसु वै श्य इति १ आयामतृतीयेन त्रीणि चतु रश्राण्यनूचीनानि कारयेत् । अपर-स्योत्तरस्यां श्रोण्यां गार्हपत्यः । तस्यै व दक्षिणेंऽसेऽन्वाहार्यपचनः पूर्वस्योत्तरेंऽस आहवनीयः २ अपि वा गार्हपत्याहवनीययोरन्तरालं पञ्चधा षोढा वा सं भु ज्य षष्ठं सप्तमं वा भागमागन्तु कमु पसमस्य समं त्रै धं विभज्य पूर्वस्मादन्ताद् द्वयोर्भा गयोर्लक्षणं करोति । गार्हपत्या-हवनीययोरन्तौ नियम्य लक्षणेन दक्षिणापायम्य लक्षणेशङ्कुं निहन्ति । तद्दक्षिणाग्नेरायतनं भवति ३ अपि वा प्रमाणं पञ्चमेन वर्धयेत् । तत्सर्वं पञ्चधा सं भु ज्यापरस्मादन्ताद् द्वयोर्भा गयोर्लक्षणं करोति । पृष्ठ्यान्तयोः पाशौ प्रतिमु च्य लक्षणेन दक्षिणापायम्य लक्षणेशङ्कुं निहन्ति । तद्दक्षि-णाग्नेरायतनं भवति ४ विपर्यस्तै तेनोत्करो व्याख्यातः ५ अपरेना-हवनीयं यजमानमात्री भवतीति दर्शपौर्णमासिकायां वेदेर्विज्ञायते६ तस्यास्त्रिभागोनं पश्चात्तिरश्ची । तस्या एवार्धं

पु रस्तात्तिरश्ची । एवं दीर्घचतु रश्रमेकतोऽणिमद्विहृत्य स्रक्तिषु शङ्कून्निहन्यात् ७ यावती पाश्श्वमानी द्विरभ्यस्ता तावतीं रज्जु मुभयतः पाशां कृत्वा मध्येलक्षणं करोति । दक्षिणयोः पाश्श्वयोः पाशौ प्रतिमु च्य लक्षणेन दक्षिणापायम्य लक्षणेशङ्कुं निहन्यात् । तस्मिन्पाशौ प्रतिमु च्य लक्षणेन दक्षिणं पाश्श्वं परिलिखेत् । एतेनोत्तरं पाश्श्वं व्याख्यातम् । पूर्वं पाश्श्वं तया द्विरभ्यस्तया परिलिखेत् । एवमपरम् ८ दशपदा पश्चात्तिरश्ची द्वादशपदा प्राच्यष्टापदा पु रस्तात्तिरश्चीति पाशु बन्धिकाया वेदेर्विज्ञायते। मानयोगस्तस्या व्याख्यातः । रथसं मितेत्येके षाम् । विराट् सं पन्ने-त्येके षाम् ९ शम्यामात्री चतुःस्रक्तिर्भवतीत्यु त्तरवेदेर्विज्ञायते। समच-तु रश्राविशेषात् १० वितृतीया वेदिर्भवतीति पै तृक्या वेदेर्विज्ञायते। महावेदेस्तृतीयेन समचतु रश्रकृतायास्तृतीयकरणी भवतीति । नवमस्तु भूमेर्भा गो भवति । यजमानमात्री चतुःस्रक्तिर्भवतीत्येके षाम् । दिक्षु स्रक्तयो भवन्ति ११ वेदितृतीयेयजेतेति सौत्रामणिकीं वेदिमभ्यु पदि-शन्ति । महावेदेस्तृतीयेन समचतु रश्रकृताया अष्टादशपदा पाश्श्वमानी भवति । तस्यै दीर्घकरण्यामेकतोऽणिमत्करण्यां च यथाकामीति १२

३

प्राग्वं शः षोडशप्रक्रमायामो द्वादशव्यासोऽपि वा द्वादशप्रक्रमायामो दशव्यासः १ तस्य मध्येद्वादशिको विहारः २ त्रिं शत्पदानि प्रक्रमा वा पश्चात्तिरश्ची भवति षट्त्रिं शत्प्राची चतु र्विं शतिः पु रस्तात्तिरश्चीति महावेदेर्विज्ञायते। मानयोगस्तस्या व्याख्यातः । आहवनीयात्षट्प्रक्रमान्महावेदिः ३ तत एकस्मिन्सदः । तद्दशकम् । उदक् स-प्तविं शत्यरत्नयः । अष्टादशेत्येके षाम् ४ ततश्चतु र्षु हविर्धा नम् । तद्दशकं द्वादशकं वा मानयोगस्तयोव्र्या ख्यातः ५ यूपावटीयाच्छ-ङ्कोरर्धप्रक्रममवशिष्योत्तरवेदिं विमिमीते। दशपदोत्तरवेदिर्भवतीति सोमेविज्ञायते। मानयोगस्तस्या व्याख्यातः ६ चात्वालः शम्या-मात्रोऽपरिमितो वा ७ अथोपरवाः प्रादेशमु खाः प्रादेशान्तरालाः । अरत्निमात्रं समचतु रश्रं विहृत्य स्रक्तिषु शङ्कून्निहन्यात् । अर्धप्रादेशे-नार्धप्रादेशेनै क कं मण्डलं परिलिखेत् ८ सदसः पूर्वा र्धाद्द्विप्रक्रमम-वशिष्य धिष्ण्यानां द्विप्रादेशो विष्कम्भस्तथान्तरालाः ९ आग्नीध्रा-गारस्य पाश्श्वमानी पञ्चारत्निः १० एतेन मार्जा लीयो व्याख्यातः । तस्योदीचीं द्वारं कु र्वन्ति ११ रथाक्षान्तराला यूपावटा भवन्तीत्येका-दशिन्यां विज्ञायते। तस्या दशानां च रथाक्षाणामेकादशानां च प-दानामष्टाङ्गु लस्य च चतु र्विं शं भागमाददीत । स प्रक्रमः स्यात् । तेन वेदिं विमिमीते१२ अथाश्वमेधेविं शत्याश्च रथाक्षाणामेकविं शत्याश्च पदानामष्टाङ्गु लस्य च चतु र्विं शं भागमाददीत । स प्रक्रमः स्यात् । तेन वेदिं विमिमीते१३ अथ प्राच्येकादशिन्यां यूपार्थं वेदेः पूर्वा र्धा त्प-दार्धव्यासमपच्छिद्य तत्पु रस्तात्प्राञ्चं दध्यात् । नात्राष्टाङ्गु लं विद्यते। न व्यतिषङ्गः १४ यूपावटाः पदविष्कम्भास्त्रिपदपरिणाहानि यूपोपरा-णीति १५

४

अर्धा ष्टमाः पुरुषाः प्रथमोऽग्निः । अर्धनवमा द्वितीयः । अर्धदशमास्तृ-तीयः । एवमु त्तरोत्तरो विधाभ्यास एकशतविधात् । तदेतत्सप्तविध-प्रभृत्येकशतविधान्तम् १ अत ऊध्ध्वमेकशतविधानेव प्रत्याददीत । अनग्निकान्वा यज्ञक्रतूनाहरेत् । अन्यत्राश्वमेधात् २ अश्वमेधमप्राप्तं चेदाहरेदत ऊध्ध्वं विधामभ्यस्येन्नेतरदाद्रियेत ३ अतीतं चेदाहरेदाहृत्य कृतान्तादेव प्रत्याददीत ४ कथमु खलु विधामभ्यस्येत् ५ यदन्य-त्प्रकृतेस्तत्पञ्चदश भागान्कृत्वा विधायां विधायां द्वौ द्वौ भागौ समस्येत् । ताभिरर्धा ष्टमाभिरग्निं चिनु यात् ६ ऊध्ध्वप्रमाणाभ्यासं जानोः पञ्चमस्य चतु र्विं शेनै के समामनन्ति ७ अथ है क एकविधप्रभृतीनपक्षपु च्छां श्चि-न्वते८ तन्नोपपद्यतेपूर्वो त्तरविरोधात् ९ अथ है के षां ब्राह्मणं भवति श्येनचिदग्नीनां पूर्वा ततिरिति १० अथापरेषां न ज्यायां सं चित्वा कनी-यां सं चिन्वीतेति ११ अथास्माकं । पक्षी भवति । न ह्यपक्षः पतितु मर्हति । अरत्निना पक्षौ द्राघीयां सौ भवतः । तस्मात्पक्षप्रवयां सि वयां सि । व्याममात्रौ पक्षौ च पु च्छं च भवतीति १२ नापक्षपु च्छः श्येनो विद्यते। न चासप्तविधस्य पक्षपु च्छानि विद्यन्ते। न च सप्त-विधं चित्वै कविधप्रसङ्गः । तस्मात्सप्तविध एव प्रथमोऽग्निः १३ भेदान्वर्जयेत् । अधरोत्तरयोः पाश्श्वसं धानं भेदा इत्यु पदिशन्ति । तद-ग्न्यन्तेषु न विद्यतेन स्रक्तिपाश्श्वयोः १४ साहस्रं चिन्वीत प्रथमं चिन्वान इति १५ पञ्चमायां वा चितौ सं ख्यां पूरयेत् १६ द्विशताश्चेच्चिकी-र्षेत्पञ्चचोडाभिर्ना कसदः समानसं ख्यं प्रतीयात् १७

५

पशु धर्मो ह वा अग्निः । यथा ह वै पशोर्दक्षिणेषामस्थ्नां यद्दक्षिणं पाश्श्वं तदु त्तरेषामु त्तरं यदु त्तरेषां दक्षिणं तद्दक्षिणेषामु त्तरं यदवाक् चोध्ध्वं च तत्समानमेवमिष्टकानां रूपाण्यु पदध्यात् १ या दक्षिणावृतो लेखास्ता दक्षिणत उपदध्यात् सव्यावृत उत्तरतः । अजु लेखाः पश्चाच्च पु रस्ताच्च भवन्ति । त्र्यालिखिता मध्ये। अथ या विशयस्था यथा ह वै पशोः पृष्ठवं शो नै वै कस्मिन्पाश्श्वेव्यतिरेके ण वर्ततेनै वापरस्मिन्नेवं तासामु पधानं प्रतीयात् २ अथापि ब्राह्मणं भवति । प्रजापतिर्वा अथर्वा ग्निरेव दध्यङ् ङाथर्वणस्तस्येष्टका अस्थानीति ३ तस्माद् बहिस्तन्वं चेच्चिनु यात्तन्वोपप्लवमध्यै रात्मोपप्लवमध्यात् सं दध्यात् ४ प्राञ्चमेनं चिनु त इति विज्ञायते५ अमृन्मयीभिरनिष्टकाभिर्नसं ख्यां पूरयेत् ६ इष्टकचिद्वा अन्योऽग्निः पशु चिदन्य इत्येतस्माद् ब्राह्मणात् ७ पशु र्वा एष यदग्निर्यो निः खलु वा एषा पशोर्विक्रियतेयत्प्राची-नमै ष्टाकाद्यजुः क्रियत इति च ८ लोकबाधीनि द्रव्याण्यवटेषूपदध्यात् ९ मण्डलमृषभं विकर्णी मितीष्टकासु लक्ष्माणि प्रतीयात् १० इष्टकाम-न्त्रयोरिष्टिकाव्यतिरेके लोकं पृणाः सं प्रद्यन्तेपरिमाणाभावात् ११ अती-तानेव वेष्टकागणानत्रोपदध्यात् १२ पञ्च लोकं पृणाः १३ मन्त्रव्यतिरे-केऽक्ताः शक राः सं धिषूपदध्यात् १४ प्राचीरुपदधाति प्रतीचीरुपदधा-तीति गणेषु रीतिवादः १५ प्राचीमु पदधाति प्रतीचीमु पदधातीति कर्तु -र्मु खवादः १६ पु रस्तादन्याः प्रतीचीरुपदधाति पश्चादन्याः प्राचीरित्य-पवर्गः १७ चतु रश्रास्वेवै तदु पपद्यते१८

६

न खण्डामु पदध्यात् । न भिन्नामु पदध्यात् । न कृष्णामु पदध्यात् । न जीर्णा मु पदध्यात् । न लक्ष्मणामु पदध्यात् । न स्वयमातृण्णां स्वयं चितावु पदध्यात् १ ऊध्ध्वप्रमाणमिष्टकानां जानोः पञ्चमेन कारयेत् । अर्धेन नाकसदां पञ्चचोडानां च २ यच्छोषपाकाभ्यां प्रतिह्रसेत पु रीषेण तत्सं पूरयेत् पु रीषस्यानियतपरिमाणत्वात् ३ व्यायाममात्री भवतीति गार्हपत्यचितेर्विज्ञायते४ चतु रश्रेत्येके षां । परिमण्डले-त्येके षाम् ५ चतु रश्रं सप्तधा विभज्य तिरश्चीं त्रेधा विभजेत् । अपर-स्मिन्प्रस्तार उदीचीरुपदधाति ६ समचतु रश्राश्चेदु पदध्याद्व्यायामषष्ठे - नेष्टकाः कारयेच्चतु र्थेन तृतीयेनेति । तासां नव प्रथमा द्वादश द्वितीया इति पूर्वस्मिन्प्रस्तार उपदधाति । पञ्च तृतीयाः षोडश प्रथमा इत्यपर-स्मिन् ७ परिमण्डलायां यावत्सं भवेत्तावत्समचतु रश्रं कृत्वा तन्नवधा विभजेत् प्रर्धी स्त्रिधा त्रिधेति । अपरं प्रस्तारं तथोपदध्याद्यथा प्रध्यनी-के षु स्रक्तयो भवन्ति ८ धिष्ण्या एकचितीकाश्चतु रश्राः परिमण्डला वा ९ तेषामाग्नीध्रीयं नवधा विभज्यै कस्याः स्थानेऽश्मानमु पदध्यात् १० अथ होतु र्धिष्ण्यं नवधा विभज्य पूर्वां स्त्रिभागानेक कं द्वे धा विभजेत् ११ अथेतरान्नवधा नवधा विभज्य मध्यमपूर्वौ द्वौ भागौ समस्येत् १२ अथ मार्जा लीयं त्रेधा विभज्य पूर्वा परौ भागौ पञ्चधा विभजेत् १३ उख्यभस्मना सं सृज्येष्टकाः कारयेदिति १४ सं वत्सरभृत एवै तदु पपद्यते न रात्रिभृतः १५ एवमस्य मन्त्रवती चितिक्लृप्तिः १६ छन्दश्चितं त्रिषा-हस्रस्य परस्ताच्चिन्वीत कामविवेकात् तस्य रूपं श्येनाकृतिर्भवतीति १७

७

अथ वै भवति श्येनचितं चिन्वीत सु वर्गकाम इति १ आकृतिर्द्वै विध्यम् । चतु राश्रात्मा श्येनाकृतिश्च २ विज्ञायतेउभयं ब्राह्मणम् ३ पञ्च द-क्षिणायां श्रोण्यामु पदधाति पञ्चोत्तरस्याम् । बस्तो वय इति दक्षिणेंऽस उपदधाति । वृष्णिर्वय इत्यु त्तरे। व्याघ्रो वय इति दक्षिणेपक्ष उप-दधाति । सिं हो वय इत्यु त्तरेपु रुषो वय इति मध्य इति च ४ अथापरं वयसां वा एष प्रतिमया चीयतेयदग्निरिति । उत्पततां छाययेत्यर्थः ५ समचतु रश्राभिरग्निं चिनु तेदै व्यस्य च मानु षस्य च व्यावृत्त्या इति मै त्रायणीयब्राह्मणं भवति ६ तस्येष्टकाः कारयेत् पुरुषस्य चतु र्थेन पञ्च-मेन षष्ठे न दशमेनेति ७ अथाग्निं विमिमीते ८ यावान्पु रुष ऊध्ध्वबा-हुस्तावदन्तरालेवेणोश्छिद्रेकरोति । मध्येतृतीयं । यदमु त्र स्पन्द्यया करोति तदिह वेणु ना करोति ९ तस्यात्मा समचतु रश्रश्चत्वारः पुरुषाः । पक्षः समचतु रश्रः पुरुषः । स तु दक्षिणतोऽरत्निना द्राघीयान् । एतेनोत्तरः पक्षो व्याख्यातः । पु च्छः समचतु रश्रः पुरुषः । तमवस्ता-त्प्रादेशेन वर्धयेत् । एवं सारत्नि प्रादेशा सप्तविधः सं प्रद्यतः १० उपधाने पक्षाग्रादु त्तरतः पुरुषतृतीयवेलायां चतस्रः पञ्चम्यस्तासामभितो द्वे द्वे पादेष्टके ततोऽष्टौ चतु थ्य्यः । पक्षशेषं षड् भागीयाभिः प्रच्छादयेत् । एतेनोत्तरः पक्षो व्याख्यातः ११ पूर्वा परयोः पु च्छपाश्श्वयोश्चतु र्भा गीया उपदध्यात् । दक्षिणोत्तरयोः पादेष्टकाः । शेषमग्निं पञ्चमभागीयाभिः प्रच्छादयेत् १२ एष द्विशतः प्रस्तारः १३ अपरस्मिन्प्रस्तारेपक्षाग्रा-दु त्तरतोऽर्धव्यायामवेलायां तिस्रस्तिस्रः षष्ठ्यो द्वे द्वे द्विपदेइति विपर्या -समु पदध्यात् । तथोत्तरे१४ दक्षिणस्यां श्रोण्यां नव षष्ठ्यश्चतु रश्रकृताः । तथोत्तरस्याम् १५ नव नव षष्ठ्यो द्वे द्वे दिपदेइति दक्षिणादं सादु -त्तरादं साद्विपर्या समु पदध्यात् १६ शेषमग्निं पञ्चमभागीयाभिः प्रच्छादये त् १७ एष द्विशतः प्रस्तारो व्यत्यासं चिनु याद्यावतः प्रस्तारां श्चिकीर्षेत् १८

८

अथापरः १ पुरुषस्य पञ्चम्यः । ता एवै कतोऽध्यर्धाः । तासामध्ध्याः पाद्याश्च २ उपधाने। पूर्वा परयोः पक्षपाश्श्वयोरर्धेष्टका उदीचीरुपदध्यात् । तथोत्तरे३ दक्षिणोत्तरयोः पु च्छपाश्श्वयोश्चतस्रश्चतस्रोऽध्यर्धा उदीचीः । पु च्छस्यावस्ताच्चतस्रोऽर्धेष्टका उदीचीः । तासामभितो द्वे पादेष्टके । जघनेन पु च्छाप्ययोरेक कामर्धेष्टकां प्राचीम् ४ शेषमग्निं पञ्चमभा-गीयाभिः प्रच्छादयेत् ५ एष द्विशतः प्रस्तारः ६ अपरस्मिन् प्रस्तार आत्मस्रक्तिषु चतस्रः पादेष्टका उपदध्यात् । तासामभितो द्वे द्वे अर्धेष्टके । पूर्वस्मिन्ननिके पञ्च ७ पक्षाग्रयोस्तिस्रस्तिस्रोऽध्यर्धा उदीचीः । तासामन्तरलेष्वेक कामर्धेष्टकां प्राचीम् ८ शेषमग्निं पञ्चमभागीयाभिः प्रच्छादयेत् ९ एष द्विशतः प्रस्तारो व्यत्यासं चिनु याद्यावतः प्रस्तारां -श्चिकीर्षेत् १०

९

अथ वक्रपक्षो व्यस्तपु च्छः १ तस्येष्टकाः कारयेत्पु रुषस्य चतु थ्य्यः । तासामध्ध्याः पाद्याश्च । नित्यमक्ष्ण् यापच्छे दनमनादेशे२ पादेष्टका-श्चतु र्भिः परिगृह्णीयादर्धपदेन पदेनाध्यर्धपदेन पदसविशेषेणेति । तेद्वे यथा दीर्घसं श्लिष्टेस्यातां तथार्धेष्टकां कारयेत् ३ अथाग्निं विमिमीत । आत्मा द्विपु रुषायामो दशपदव्यासः । तस्य दक्षिणादं सादु त्तर-तोऽध्यर्धप्रक्रमेलक्षणं करोति । एवमपरतः । तयोरुपरिष्टात्स्पन्द्यां नियम्यां समपच्छिन्द्यात् । एतेनेतरासां स्रक्तीनामपच्छे दा व्याख्याताः । स आत्मा ४ शिरोऽर्धषष्ठपदायाममर्धपु रुषव्यासं । तस्यां सौ प्रक्रमेण प्रक्रमेणापच्छिन्द्यात् ५ पु च्छस्य षट् पदा प्राची द्विपु रुषोदीची । तस्य पूर्वस्रक्ति त्रिभिस्त्रिभिः प्रक्रमै रपच्छिन्द्यात् ६ पक्षो द्वाद-शपदायामो दशपदव्यासः । तस्य मध्यात्प्राञ्चि षट् पदानि प्रक्रम्य शङ्कुं निहन्यात् । श्रोण्योरेक कम् । अथै नं स्पन्द्यया परिचिनु यात् । अन्त-स्पन्द्यमपच्छिद्य तत्पु रस्तात् प्राञ्चं दध्यात् । स निर्णा मः । एतेनोत्तरस्य पक्षस्य निर्णा मो व्याख्यातः ७ पक्षाग्रयोः प्रक्रमप्रमाणानि पञ्च पञ्च चतु रश्राण्यनूचीनानि कृत्वा सर्वा ण्यवाञ्चमक्ष्णयापच्छिन्द्यादर्धा न्यु -द्धरेत् ८ एवं सारत्निप्रादेशः सप्तविधः सं पद्यतः ९ उपधानेशिरसो-ऽप्ययेचतु र्थी मु पदध्यात् । हं समु खी पु रस्तात् । पादेष्टके अभितः । तयोरवस्तादभितस्तिस्रस्तिस्रश्चतु रश्रपाद्याः । शेषेपादेष्टकाः १० अपि वा शिरसोऽग्रेहं समु खीमु पदध्यात्तस्य अवस्ताच्चतु र्थी मु पदध्यात्पादेष्टके अभितः । तयोरवस्तादभितस्तिस्रस्तिस्रश्चतु रश्रपाद्याः । शेषेपादेष्ट-काः ११ शिरसोऽवस्तात्पञ्चपादेष्टका व्यतिषक्ता उपदध्यात् । तथा पु च्छस्य पु रस्तात् यद्यदपच्छिन्नं तस्मिन्नर्धेष्टकाः पादेष्टकाश्चोपदध्यात् १२ शेषमग्निं चतु र्भा गीयाभिः प्रच्छादयेत् । पाद्याभिः साध्ध्या भिः सं ख्यां पूरयेत् १३ एष द्विशतः प्रस्तारः १४ अपरस्मिन्प्रस्तारेहं समु खी-श्चतस्रश्चतसृभिः पादेष्टकाभिः सं

योजयेद्यथा दीर्घचतु रश्रं सं पद्यते। तत्तिर्यक् स्वयमातृण्णावकाश उपदध्यात् १५ हं समु ख्यौ प्रतीच्यौ पु च्छाप्ययेऽर्धपदेनात्मनि विशये। तयोरवस्तादभितस्तिस्रः पादेष्टकाः प्राङ्ग खीरुपदध्यात् १६ पु च्छस्यावस्तात्पञ्चदश पादेष्टका व्यतिषक्ता उपदध्यात् १७ पादेष्टके अर्धेष्टके ति पक्षपत्राणां प्राचीव्व्यत्यासं चिनु -यात् १८ विशयेयदपच्छिन्नं तस्मिन्नर्धेष्टकाः पादेष्टकाश्चोपदध्यात् १९ शेषमग्निं चतु र्भा गीयाभिः प्रच्छादयेत् । पाद्याभिः साध्ध्या भिः सं ख्यां पूरयेत् २०

१०

अथापरः १ पुरुषस्य पञ्चमीभिः शतमशीतिः सप्तार्धं च सारत्निप्रादेशः सप्तविधः सं पद्यते२ तासां पञ्चाशद् द्वे चात्मन्यर्धचतु थ्य्यः शिरसि । पञ्चदश पु च्छे । अष्टपञ्चाशत्साध्ध्या दक्षिणेपक्ष उपदध्यात् । तथोत्तरे ३ अर्धव्यायामेन स्रक्तीनामपच्छे दः । सं नतं पु च्छं । पक्षयोस्त्रिभि-स्त्रिभिररत्निभिरपनामः । अध्यध्ध्या भिः षट् षट् पत्राणि कु र्या त् । आकृतिः शिरसो नित्या ४ अथेष्टकानां विकाराः ५ पुरुषस्य पञ्चम्यस्ता एवै कतोऽध्यर्धाः । ता एवै कतः सपादाः । पञ्चमभागीयायाः पाद्याः साध्ध्याः । तथाध्यर्धा याः । तयोश्चाष्टमभागौ तथा श्लेषयेद्यथा तिस्रः स्रक्तयो भवन्ति । पञ्चमभागीयायाश्चाष्टम्यः । तानि दश ६ आत्मनि पञ्चमभागीयाः साध्ध्या उपदध्यात् । तथा पु च्छे ७ पक्षयोश्चाध्यर्धाः साध्ध्याः ८ शिरसि याः सं भवन्ति ९ अपरस्मिन्प्रस्तारेपूर्वयोः पक्षाप्य-ययोरेक कामु भयीमु पदध्यात् । एक कामपरयोः । द्वे द्वे शिरसः पाश्श्वयोः १० पु च्छस्यावस्तादध्यर्धाः प्राचीर्यथावकाशम् । पाश्श्वयोः पाद्याः साष्टमभागाः ११ पक्षयोश्चाध्यर्धाः सावयवाः १२ शेषं यथायोगं यथासं ख्यं यथाधर्मं चोपदध्यात् १३

११

कङ्कचित एतेनात्मा पु च्छं च व्याख्यातम् १ शिरसि पञ्चोपदध्यात् । तस्याकृतिव्व्या ख्यात २ सप्तपञ्चाशद्दक्षिणेपक्ष उपदध्यात् । तथोत्तरे ३ व्यायामेन सप्रादेशेन पक्षयोरपनामः । पञ्चमभागीयाध्ध्या भिः षट् षट् पत्राणि कु र्या त् । अध्यर्धा वशिष्यते४ तया पु च्छस्यावस्तात् पादावरत्निमात्रावरत्न्यन्तरालौ प्रादेशव्यासौ भवतः । तयोरवस्ताद-भितो द्वौद्वावष्टमभागौ प्राग्भेदावु पदध्यात् ५ एवं सारत्निप्रादेशः सप्त-विधः सं पद्यते६ अथेष्टकानां विकाराः । पञ्चमभागीयाः सावयवाः । पादेष्टकां चतु र्भिः परिगृह्णीयादर्धप्रादेशेनाध्यर्धप्रादेशेन प्रादेशेन प्रा-देशसविशेषेनेति । अध्यर्धेष्टकां चतु र्भिः परिगृह्णीयादर्धव्यायामेन द्वा-भ्यामरत्निभ्यामरत्निसविशेषेनेति । ताः षट् ७ तासां चतु रश्रपाद्याः साष्टमभागाः पादयोरुपधाय शेषं यथायोगं यथासं ख्यं यथाधर्मं चोपदध्यात् ८

१२

अलजचित एतेनात्मा शिरः पु च्छं च व्याख्यातं पादावपोद्ध त्य १ त्रिषष्टिर्दक्षिणेपक्ष उपदध्यात् । तथोत्तरे२ पुरुषेण पक्षयोरपनामः ३ अपरस्मादपनामात्प्राञ्चमरत्निं मित्वा तस्मिन्स्पन्द्यां नियम्यापरं पक्षप-त्रापच्छे दमन्वायच्छे त् ४ एवं पञ्च पञ्चम्यः साध्ध्या उद्ध ता भवन्ति ५ पादेष्टकामपनाम उपध्याय तासां चतु रश्र पाद्याः साष्टमभागा अपोद्ध त्य शेषं यथायोगं यथासं ख्यं यथाधर्मं चोपदध्यात् ६

१३

प्रौगचितं चिन्वीतेति १ यावानग्निः सारत्निप्रादेशस्तावत्प्रौगं कृत्वा तस्यापरस्याः करण्या द्वादशेनेष्टकास्तदर्धव्यासाः कारयेत् । तासाम-ध्ध्याः पाद्याश्च २ तासां द्वे अर्धेष्टके बाह्यसविशेषेचु बु क उपदध्या-दध्ध्या श्चान्तयोः ३ शेषमग्निं बृहतीभिः प्रच्छादयेदर्धेष्टकाभिः सं ख्यां पूरयेत् ४ अपरस्मिन्प्रस्तारेऽपरस्मिन्ननीके सप्तचत्वारिं शत्पादेष्टका व्य-तिषक्ता उपदध्यात् ५ चु बु क एकां शूलपाद्याम् ६ दीर्घेचेतरेचतस्रः स्वयमातृण्णावकाश उपदध्यादध्ध्या श्चान्तयोः ७ शेषमग्निं बृहतीभिः प्राचीभिः प्रच्छादयेदर्धेष्टकाभिः सं ख्यां पूरयेत् ८

१४

उभयतः प्रौगं चिन्वीतेति १ यावानग्निः सारत्निप्रादेशस्तावदु भयतः प्रौगं कृत्वा नवमेन तिर्यङ्मान्याः प्रौगचितोक्ता विकाराः २ तथोपधानम् ३ अपरस्मिन्प्रस्तारेचु बु कयोद्ध् र्वेपादेष्टके उपदध्यात् । सं ध्यन्तयोश्च दीर्घपाद्ये४ दीर्घेचेतरेच चतस्रः स्वयमातृण्णावकाश उपदध्या-दध्ध्या श्चान्तयोः ५ शेषमग्निं बृहतीभिः प्राचीभिः प्रच्छादयेदर्धेष्टकाभिः सं ख्यां पूरयेत् ६

१५

रथचक्रचितं चिन्वीतेति विज्ञायते१ द्वयानि तु खलु रथचक्राणि भवन्ति साराणि च प्रधियु क्तानि च । अविशेषात्तेमन्यामहेऽन्यतर-स्याकृतिरिति २ अथाग्निं विमिमीते। यावानग्निः सारत्निप्रादेश-स्तावतीं भूमिं परिमण्डलां कृत्वा तस्मिन्यावत्सं भवेत्तावत्समचतु रश्रं

कृत्वा तस्य करण्या द्वादशेनेष्टकाः कारयेत् ३ तासां षट् प्रधावु पधाय शेषमष्टधा विभजेत् ४ अपरं प्रस्तारं तथोपदध्याद्यथा प्रध्यनीके षु स्र-क्तयो भवन्ति ५ अथापरः ६ पुरुषार्धा त्पञ्चदशे नेष्टकाः समचतु रश्राः कारयेन्मानार्थाः ७ तासां द्वे शतेपञ्चविं शतिश्च सारत्निप्रादेशः सप्तविधः सं पद्यते८ तास्वन्याश्चतुःषष्टिमावपेत् । ताभिः समचतु रश्रं करोति । तस्य षोडशेष्टका पाश्श्वमानी भवति । त्रयस्त्रिं शदतिशिष्यन्ते। ताभिरन्तान्सर्वशः परिचिनु यात् ९ नाभिः षोडश मध्यमाः । चतुःष-ष्टिरराश्चतुःषष्टिर्वेदिः । नेमिः शेषाः १० नाभिमन्ततः परिलिखेत् । नेमिमन्ततश्चान्तरतश्च परिलिख्य । नेमिनाभ्योरन्तरालं द्वात्रिं शद्धा वि-भज्य विपर्या सं भागानु द्धरेत् । एवमावाप उद्ध तो भवति ११ नेमिं चतुःषष्टिं कृत्वा व्यवलिख्य मध्येपरिकृषेत् । ता अष्टाविं शतिशतं भवन्ति १२ अरां श्चतु र्धा चतु र्धा नाभिमष्टधा विभजेत् १३ एष प्रथमः प्रस्तारः १४ अपरस्मिन्प्रस्तारेनाभिमन्ततश्चतु र्थवेलायां परिकृषेत् । नेमिमन्तरतः १५ नेमिमन्तरतश्चतुःषष्टिं कृत्वा व्यवलिखेत् १६ अराणां पञ्चधा विभाग आपरिकर्षणयोः १७ नेम्यामन्तरालेषु द्वे द्वे नाभ्यामन्त-रालेष्वेक कां १८ यच्छे षं नाभेस्तदष्टधा विभजेत् १९ स एष षोडशक-रणः सारो रथचक्रचित् २०

१६

द्रोणचितं चिन्वीतेति विज्ञायते १ द्वयानि तु खलु द्रोणानि भवन्ति चतु रश्राणि च परिमण्डलानि च । अविशेषात्तेमन्यामहेऽन्य-तरस्याकृतिरिति २ अथाग्निं विमिमीते। चतु रश्र आत्मा भवति । तस्य त्रयः पुरुषास्त्रिभागोनाः पश्श्वमानी ३ पश्चात्त् सरुर्भवति । तस्यार्धपु रुषो दशाङ्गु लानि च प्राची । त्रिभागोनः पुरुष उदीचीति ४ एवं सारत्निप्रादेशः सप्तविधः सं पद्यते५ अथेष्टकानां विकाराः । पु रुषस्य षष्ठ्यस्ता एवं कतोऽध्यर्धाः । तासामध्ध्या स्तिर्यग्भेदाः पुरुषस्य चतु र्थ्यइति ६ तासां त्सरुश्रोण्यन्तरालयोः षट् षष्टीरुपधाय शेषमग्निं बृहतीभिः प्रच्छादयेत् । अर्धेष्टकाभिः सं ख्यां पूरयेत् ७ अपरस्मि-न्प्रस्तारेदक्षिणेंऽसेऽध्यर्धा मु दीचीमु पदध्यात् । तथोत्तरे८ पूर्वस्मिन्न-नीके षड् भागीया उपदध्यात् ९ दक्षिणोत्तरयोश्चतु र्भा गीयाः १० त्सरोः पु रस्तात्पाश्श्वयोद्ध् र्वेचतु र्भा गीयेउपदध्यात् । तयोरवस्तादभितो द्वे द्वे अध्यर्धेविषूची । तयोरवस्तान्मध्यदेशेद्वे षष्ठ्यौ प्राच्यौ ११ शेषमग्निं बृहतीभिः प्राचीभिः प्रच्छादयेत् । अर्धेष्टकाभिः सं ख्यां पूरयेत् १२

१७

अथापरः १ पुरुषस्य षोडशीभिर्विं शशतं सारत्निप्रादेशः सप्तविधः सं पद्यते२ तासामेकामपोद्ध त्य शेषाः परिमण्डलं करोति ३ तत्पूर्वेण रथचक्रचिता व्याख्यातम् ४ षोडशीं पु रस्ताद्विशय उपधाय तया सह मण्डलं परिलिखेत् ५ यदवस्तादपच्छिन्नं तत्पु रस्तादु पदध्यात् ६ प्रधीनां सप्तधा विभागः ७ प्रधिमध्यमाः प्रक्रमव्यासा भवन्ति ८ च-तु रश्राणामध्ध्या भिः सं ख्यां पूरयेत् ९ अपरस्मिन्प्रस्तारेप्रधिमध्यमामोष्ठ उपधाय यदवस्तात्तद् द्वे धा विभजेत् १० स एष नवकरणो द्रोणचि-त्परिमण्डलः ११ समूह्य परिचाय्यौ पूर्वेण रथचक्रचिता व्याख्यातौ १२ समूह्यस्य दिक्षु चात्वालान् खानयित्वा तेभ्यः पु रीषं समूह्यो-पदध्यात् १३ परिचाय्य इष्टकानां देशभेदः १४ तं सर्वा भिः प्रदक्षिणं परिचिनु यात् १५

१८

श्मशानचितं चिन्वीतेति विज्ञायते१ सर्वमग्निं चतु रश्रान्पञ्चदश भागा-न्कृत्वा तेषामाख्यातमु पधानम् २ त्रिभिर्भा गै र्भा गार्धव्यासं दीर्घचतु रश्रं विहृत्य पूर्वस्याः करण्या मध्याच्छ्रोणी प्रत्यालिख्यान्तावु द्धरेत् । तस्य दशधा विभागः ३ तानि विं शतिः सर्वोऽग्निः सं पद्यते४ अपरस्मि-न्प्रस्तारेप्रौगमध्येऽनूचीनं विभजेत् । तस्य षड् धा विभागः । तेद्वे पश्श्वयोरुपदध्यात् ५ भागतृतीयायामश्चतु र्थव्यासाः कारयेत् । तासाम-ध्ध्या स्तिर्यग्भेदाः ६ ता अन्तयोरुपधाय शेषमग्निं बृहतीभिः प्राचीभिः प्रच्छादयेत् । अर्धेष्टकाभिः सं ख्यां पूरयेत् ७ ऊध्ध्वप्रमाणमग्नेः पञ्चमेन वर्धयेत् ८ तत्सर्वं त्रेधा विभज्य द्वयोर्भा गयोश्चतु र्थेन वा नवमेन वा चतु र्दशेन वेष्टकाः कारयेत् ९ ताभिश्चतस्रो वा नव वा चतु र्दश वा चितिरुपधाय शेषमवाञ्चमक्ष्णयापच्छिन्द्यात् । अर्धमु द्धरेत् १० तस्य नित्यो विभागो यथायोगमिष्टकानां ह्रासवृद्धि ११

१९

कत्न र्मचितं चिन्वीत यः कामयेत ब्रह्मलोकमभिजयेयमिति । विज्ञायते १ द्वयाः खलु कत्न र्मा भवन्ति वक्राङ्गाश्च परिमण्डलाश्च । अविशेषात्ते मन्यामहेऽन्यतरस्याकृतिरिति २ अथाग्निं विमिमीते। चतु रश्र आत्मा भवति । तस्य दश प्रक्रमाः पाश्श्वमानी भवति । तस्य द्वाभ्यां द्वाभ्यां प्रक्रमाभ्यां स्रक्तीनामपच्छे दः ३ पूर्वस्मिन्ननीके प्रक्रमप्रमाणानि च-त्वारि चतु रश्राणि कृत्वा तेषां येअन्त्येतेअक्ष्णयापच्छिन्द्यात् । एवं दक्षिणत एवं पश्चादेवमु त्तरतः । स आत्मा ४ शिरः पञ्चपदायाम-मर्धपु रुषव्यासम् । तस्यां सौ प्रक्रमेण प्रक्रमेणापच्छिन्द्यात् ५ स्रक्त्य-पच्छे देपादानु न्नयेत् । तस्य द्विपदाक्ष्णया तिरश्ची तद्द्विगु णायाममनूची । तस्य द्विपदाक्ष्णया पूर्वमं समपच्छिन्द्यात् । एतेनेतरेषां पादानामप-च्छे दा व्याख्याताः । अपरयोः पादयोरपरावं सावपच्छिन्द्यात् ६ एवं सारत्निप्रादेशः सप्तविधः सं पद्यते७ तस्येष्टकाः कारयेत्पु रुषस्य चतु -र्थ्यस्तासामध्ध्याः पाद्याश्च ८ अध्यर्धपाद्याश्चतु र्भिः परिगृह्णीयात्प्रक्रमेण द्वाभ्यां पदाभ्यां पदसविशेषेणेति ९ तेद्वे यथा दीर्घसं श्लिष्टेस्यातां तथै कां कारयेत् १० द्विपदाक्ष्णयार्धेन समचतु रश्रामेकां ११ उपधाने शिरसोऽग्रेचतु रश्रामु पदध्यात् । हं समु ख्याववस्तात् १२ पञ्च पञ्च चतु रश्रा द्वे द्वे पादेष्टके इति पादेषूपदध्यात् १३ यद्यदपच्छिन्नं तस्मि-न्नर्धेष्टका उपदध्यात् १४ शेषमग्निं चतु र्भा गीयाभिः प्रच्छादयेत् । अर्धेष्टकाभिः सं ख्यां पूरयेत् १५ अपरस्मिन्प्रस्तारेशिरसोऽग्रेहं

समु -खीमु पदध्यात्पादेष्टके अभितः १६ तयोरवस्तादभितो द्वे द्वे अध्यर्धपाद्ये विषूची १७ तयोरवस्तादभितश्छे दसं हितेद्वे पादेष्टके १८ द्वे द्वे द्विपदे तिस्रस्तिस्रोऽर्धेष्टका इति पादेषूपदध्यात् १९ यद्यदपच्छिन्नं तस्मिन्न-र्धेष्टकाः पादेष्टकश्चोपदध्यात् २० शेषमग्निं चतु र्भा गीयाभिः प्रच्छादयेत् । अर्धेष्टकाभिः सं ख्यां पूरयेत् २१

२०

अथापरः १ पुरुषस्य षोडशीभिर्वि शशतं सारत्निप्रादेशः सप्तविधः सं पद्यते२ तासां पञ्च षोडशीरपोद्ध त्य शेषाः परिमण्डलं करोति । तदु त्तरेण द्रोणचिता व्याख्यातम् ३ अथ ताः पञ्च षोडश्यस्ताभि-रवान्तरदिक्षु पादानु न्नयेच्छिरः पु रस्तात् । तासां परिकर्षणं व्याख्यातम् ४ प्रधीनां सप्तधा विभागः प्रधिमध्यमाः प्रक्रमव्यासा भवन्ति ५ यदतिरिक्तं सं पद्यतेतच्चतु रश्राणामध्यर्धा भिर्यो यु ज्येत ६ अपरस्मिन्प्रस्तारे पादानां शिरोवद्विभागः शिरसः पादवत् ७ व्यत्यासं चिनु याद्यावतः प्रस्तारां श्चिकीर्षेत् ८ कल्न र्मस्यान्तेतनु पु रीषमु पदध्यान्मध्येबहुलम् । एतदेव द्रोणेविपरीतम् ९ अथ है क एकविधप्रभृतीन्प्रौगादीन् ब्रु वते १० समचतु रश्रानेक आचार्याः । तस्य करण्या द्वादशेनेष्टकाः कारा-येत्तासामध्ध्याः पाद्याश्च ११ अथाश्वमेधिकस्याग्नेः पुरुषाभ्यासो ना-रत्निप्रादेशानां १२ प्राकृतो वा त्रिगु णः । त्रिस्तावोऽग्निर्भवतीत्येक-विं शोऽग्निर्भवतीत्यु भयं ब्राह्मणमु भयं ब्राह्मणम् १३

२१

इति बौधायनशुल्बसूत्रम्

वाह्यसूत्राणि

- बौधायन शुल्बसूत्रम् - फाण्टपरिवर्तक द्वारा इदम् फाइलम् यूनिकोडे परिवर्तित्वा अत्र स्थापितम्।

"https://sa.wikisource.org/w/index.php?title=बौधायनशुल्बसूत्रम्&oldid=41875" इत्यस्माद् पुनः प्राप्तिः

- २ नवम्बर २०१५ (तमे) दिनाङ्के अन्तिमसम्पादनं ०६:४४ समये अभवत्
- पाठः क्रियेटिव कॉमन्स ऐट्रिब्यूशन/शेयर-अलाइक अभिज्ञापत्रस्य अन्तर्गततया उपलब्धः अस्ति; अन्याः संस्थित्यः अपि सन्ति । अधिकं ज्ञातुम् अत्र उपयोगस्य संस्थितिं पश्यतु ।